श्री गोविन्द-दामोदर स्तोत्रम्

Shri Govind Damodar Stotram

Source: Internet Archive — Govind Damodar Stotra of Bilva Mangal, Gita Press Gorakhpur (Mumukshu Bhawan Varanasi collection, eGangotri, CC0). Also compared: Creative Commons CC0 1.0.

द्रौपदी की पुकार और गोपियों का नाम-गान

SHLOKA 1

अग्रे कुरूणामथ पाण्डवानां दुःशासनेनाहृतवस्त्रकेशा ।
कृष्णा तदाक्रोशदनन्यनाथा गोविन्द दामोदर माधवेति ॥

Agre Kurūṇāmatha Pāṇḍavānāṃ Duḥśāsanenāhṛtavastrakeśā |
Kṛṣṇā Tadākrośadananyanāthā Govinda Dāmodara Mādhaveti ||

SHLOKA 2

श्रीकृष्ण विष्णो मधुकैटभारे भक्तानुकम्पिन् भगवन् मुरारे ।
त्रायस्व मां केशव लोकनाथ गोविन्द दामोदर माधवेति ॥

Śrīkṛṣṇa Viṣṇo Madhukaiṭabhāre Bhaktānukampin Bhagavan Murāre |
Trāyasva Māṃ Keśava Lokanātha Govinda Dāmodara Mādhaveti ||

SHLOKA 3

विक्रेतुकामाखिलगोपकन्या मुरारिपादार्पितचित्तवृत्तिः ।
दध्यादिकं मोहवशादवोचद् गोविन्द दामोदर माधवेति ॥

Vikretukāmākhilagopakanyā Murāripādārpitacittavṛttiḥ |
Dadhyādikaṃ Mohavaśādavocad Govinda Dāmodara Mādhaveti ||

SHLOKA 4

उलूखले सम्भृततण्डुलांश्च सङ्घट्टयन्त्यो मुशलैः प्रमुग्धाः ।
गायन्ति गोप्यो जनितानुरागा गोविन्द दामोदर माधवेति ॥

Ulūkhale Sambhṛtataṇḍulāṃśca Saṅghaṭṭayantyo Muśalaiḥ Pramugdhāḥ |
Gāyanti Gopyo Janitānurāgā Govinda Dāmodara Mādhaveti ||

SHLOKA 5

काचित्कराम्भोजपुटे निषण्णं क्रीडाशुकं किंशुकरक्ततुण्डम् ।
अध्यापयामास सरोरुहाक्षी गोविन्द दामोदर माधवेति ॥

Kācitkarāmbhojapuṭe Niṣaṇṇaṃ Krīḍāśukaṃ Kiṃśukaraktatuṇḍam |
Adhyāpayāmāsa Saroruhākṣī Govinda Dāmodara Mādhaveti ||

SHLOKA 6

गृहे गृहे गोपवधूसमूहः प्रतिक्षणं पिञ्जरसारिकाणाम् ।
स्खलद्गिरं वाचयितुं प्रवृत्तो गोविन्द दामोदर माधवेति ॥

Gṛhe Gṛhe Gopavadhūsamūhaḥ Pratikṣaṇaṃ Piñjarasārikāṇām |
Skhaladgiraṃ Vācayituṃ Pravṛtto Govinda Dāmodara Mādhaveti ||

SHLOKA 7

पर्य्यङ्किकाभाजमलं कुमारं प्रस्वापयन्त्योऽखिलगोपकन्याः ।
जगुः प्रबन्धं स्वरतालबन्धं गोविन्द दामोदर माधवेति ॥

Paryyaṅkikābhājamalaṃ Kumāraṃ Prasvāpayantyo'khilagopakanyāḥ |
Jaguḥ Prabandhaṃ Svaratālabandhaṃ Govinda Dāmodara Mādhaveti ||

SHLOKA 8

रामानुजं वीक्षणकेलिलोलं गोपी गृहीत्वा नवनीतगोलम् ।
आबालकं बालकमाजुहाव गोविन्द दामोदर माधवेति ॥

Rāmānujaṃ Vīkṣaṇakelilolaṃ Gopī Gṛhītvā Navanītagolam |
Ābālakaṃ Bālakamājuhāva Govinda Dāmodara Mādhaveti ||

SHLOKA 9

विचित्रवर्णाभरणाभिरामेऽभिधेहि वक्त्राम्बुजराजहंसि ।
सदा मदीये रसनेऽग्रर्ङ्गे गोविन्द दामोदर माधवेति ॥

Vicitravarṇābharaṇābhirāme'bhidhehi Vaktrāmbujarājahaṃsi |
Sadā Madīye Rasane'graraṅge Govinda Dāmodara Mādhaveti ||

यशोदा और व्रज की बाल-लीला

SHLOKA 10

अङ्काधिरूढं शिशुगोपगूढं स्तनं धयन्तं कमलैककान्तम् ।
सम्बोधयामास मुदा यशोदा गोविन्द दामोदर माधवेति ॥

Aṅkādhirūḍhaṃ Śiśugopagūḍhaṃ Stanaṃ Dhayantaṃ Kamalaikakāntam |
Sambodhayāmāsa Mudā Yaśodā Govinda Dāmodara Mādhaveti ||

SHLOKA 11

क्रीडन्तमन्तर्व्रजमात्मजं स्वं समं वयस्यैः पशुपालबालैः ।
प्रेम्णा यशोदा प्रजुहाव कृष्णं गोविन्द दामोदर माधवेति ॥

Krīḍantamantarvrajamātmajaṃ Svaṃ Samaṃ Vayasyaiḥ Paśupālabālaiḥ |
Premṇā Yaśodā Prajuhāva Kṛṣṇaṃ Govinda Dāmodara Mādhaveti ||

SHLOKA 12

यशोदया गाढमुलूखलेन गोकण्ठपाशेन निबध्यमानः ।
रुरोद मन्दं नवनीतभोजी गोविन्द दामोदर माधवेति ॥

Yaśodayā Gāḍhamulūkhalena Gokaṇṭhapāśena Nibadhyamānaḥ |
Ruroda Mandaṃ Navanītabhojī Govinda Dāmodara Mādhaveti ||

SHLOKA 13

निजाङ्गने कङ्कणकेलिलोलं गोपी गृहीत्वा नवनीतगोलम् ।
आमर्दयत्पाणितलेन नेत्रे गोविन्द दामोदर माधवेति ॥

Nijāṅgane Kaṅkaṇakelilolaṃ Gopī Gṛhītvā Navanītagolam |
Āmardayatpāṇitalena Netre Govinda Dāmodara Mādhaveti ||

SHLOKA 14

गृहे गृहे गोपवधूकदम्बाः सर्वे मिलित्वा समवाययोगे ।
पुण्यानि नामानि पठन्ति नित्यं गोविन्द दामोदर माधवेति ॥

Gṛhe Gṛhe Gopavadhūkadambāḥ Sarve Militvā Samavāyayoge |
Puṇyāni Nāmāni Paṭhanti Nityaṃ Govinda Dāmodara Mādhaveti ||

SHLOKA 15

मन्दारमूले वदनाभिरामं बिम्बाधरे पूरितवेणुनादम् ।
गोगोपगोपीजनमध्यसंस्थं गोविन्द दामोदर माधवेति ॥

Mandāramūle Vadanābhirāmaṃ Bimbādhare Pūritaveṇunādam |
Gogopagopījanamadhyasaṃsthaṃ Govinda Dāmodara Mādhaveti ||

SHLOKA 16

उत्थाय गोप्योऽपररात्रभागे स्मृत्वा यशोदासुतबालकेलिम् ।
गायन्ति प्रोच्चैर्दधि मन्थयन्त्यो गोविन्द दामोदर माधवेति ॥

Utthāya Gopyo'pararātrabhāge Smṛtvā Yaśodāsutabālakelim |
Gāyanti Proccairdadhi Manthayantyo Govinda Dāmodara Mādhaveti ||

SHLOKA 17

जग्धोऽथ दत्तो नवनीतपिण्डो गृहे यशोदा विचिकित्सयन्ती ।
उवाच सत्यं वद हे मुरारे गोविन्द दामोदर माधवेति ॥

Jagdho'tha Datto Navanītapiṇḍo Gṛhe Yaśodā Vicikitsayantī |
Uvāca Satyaṃ Vada He Murāre Govinda Dāmodara Mādhaveti ||

SHLOKA 18

अभ्यर्च्य गेहं युवतिः प्रवृद्धप्रेमप्रवाहा दधि निर्ममन्थ ।
गायन्ति गोप्योऽथ सखीसमेता गोविन्द दामोदर माधवेति ॥

Abhyarcya Gehaṃ Yuvatiḥ Pravṛddhapremapravāhā Dadhi Nirmamantha |
Gāyanti Gopyo'tha Sakhīsametā Govinda Dāmodara Mādhaveti ||

SHLOKA 19

क्वचित् प्रभाते दधिपूर्णपात्रे निक्षिप्य मन्थं युवती मुकुन्दम् ।
आलोक्य गानं विविधं करोति गोविन्द दामोदर माधवेति ॥

Kvacit Prabhāte Dadhipūrṇapātre Nikṣipya Manthaṃ Yuvatī Mukundam |
Ālokya Gānaṃ Vividhaṃ Karoti Govinda Dāmodara Mādhaveti ||

SHLOKA 20

क्रीडापरं भोजनमज्जनार्थं हितैषिणी स्त्री तनुजं यशोदा ।
आजूहवत् प्रेमपरिप्लुताक्षी गोविन्द दामोदर माधवेति ॥

Krīḍāparaṃ Bhojanamajjanārthaṃ Hitaiṣiṇī Strī Tanujaṃ Yaśodā |
Ājūhavat Premapariplutākṣī Govinda Dāmodara Mādhaveti ||

SHLOKA 21

सुखं शयानं निलये च विष्णुं देवर्षिमुख्या मुनयः प्रपन्नाः ।
तेनाच्युते तन्मयतां व्रजन्ति गोविन्द दामोदर माधवेति ॥

Sukhaṃ Śayānaṃ Nilaye Ca Viṣṇuṃ Devarṣimukhyā Munayaḥ Prapannāḥ |
Tenācyute Tanmayatāṃ Vrajanti Govinda Dāmodara Mādhaveti ||

SHLOKA 22

विहाय निद्रामरुणोदये च विधाय कृत्यानि च विप्रमुख्याः ।
वेदावसाने प्रपठन्ति नित्यं गोविन्द दामोदर माधवेति ॥

Vihāya Nidrāmaruṇodaye Ca Vidhāya Kṛtyāni Ca Vipramukhyāḥ |
Vedāvasāne Prapaṭhanti Nityaṃ Govinda Dāmodara Mādhaveti ||

SHLOKA 23

वृन्दावने गोपगणाश्च गोप्यो विलोक्य गोविन्दवियोगखिन्नाम् ।
राधां जगुः साश्रुविलोचनाभ्यां गोविन्द दामोदर माधवेति ॥

Vṛndāvane Gopagaṇāśca Gopyo Vilokya Govindaviyogakhinnām |
Rādhāṃ Jaguḥ Sāśruvilocanābhyāṃ Govinda Dāmodara Mādhaveti ||

SHLOKA 24

प्रभातसञ्चारगता नु गावस्तद्रक्षणार्थं तनयं यशोदा ।
प्राबोधयत् पाणितलेन मन्दं गोविन्द दामोदर माधवेति ॥

Prabhātasañcāragatā Nu Gāvastadrakṣaṇārthaṃ Tanayaṃ Yaśodā |
Prābodhayat Pāṇitalena Mandaṃ Govinda Dāmodara Mādhaveti ||

विरह, कालिय-प्रसंग और नाम की महिमा

SHLOKA 25

प्रवालशोभा इव दीर्घकेशा वाताम्बुपर्णाशनपूतदेहाः ।
मूले तरूणां मुनयः पठन्ति गोविन्द दामोदर माधवेति ॥

Pravālaśobhā Iva Dīrghakeśā Vātāmbuparṇāśanapūtadehāḥ |
Mūle Tarūṇāṃ Munayaḥ Paṭhanti Govinda Dāmodara Mādhaveti ||

SHLOKA 26

एवं ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः कृष्णविषक्तमानसाः ।
विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविन्द दामोदर माधवेति ॥

Evaṃ Bruvāṇā Virahāturā Bhṛśaṃ Vrajastriyaḥ Kṛṣṇaviṣaktamānasāḥ |
Visṛjya Lajjāṃ Ruruduḥ Sma Susvaraṃ Govinda Dāmodara Mādhaveti ||

SHLOKA 27

गोपी कदाचिन्मणिपिञ्जरस्थं शुकं वचो वाचयितुं प्रवृत्ता ।
आनन्दकन्द व्रजचन्द्र कृष्ण गोविन्द दामोदर माधवेति ॥

Gopī Kadācinmaṇipiñjarasthaṃ Śukaṃ Vaco Vācayituṃ Pravṛttā |
Ānandakanda Vrajacandra Kṛṣṇa Govinda Dāmodara Mādhaveti ||

SHLOKA 28

गोवत्सबालैः शिशुकाकपक्षं बध्नन्तमम्भोजदलायताक्षम् ।
उवाच माता चिबुकं गृहीत्वा गोविन्द दामोदर माधवेति ॥

Govatsabālaiḥ Śiśukākapakṣaṃ Badhnantamambhojadalāyatākṣam |
Uvāca Mātā Cibukaṃ Gṛhītvā Govinda Dāmodara Mādhaveti ||

SHLOKA 29

प्रभातकाले वरवल्लवौघा गोरक्षणार्थं धृतवेत्रदण्डाः ।
आकारयामासुरनन्तमाद्यं गोविन्द दामोदर माधवेति ॥

Prabhātakāle Varavallavaughā Gorakṣaṇārthaṃ Dhṛtavetradaṇḍāḥ |
Ākārayāmāsuranantamādyaṃ Govinda Dāmodara Mādhaveti ||

SHLOKA 30

जलाशये कालियमर्दनाय यदा कदम्बादपतन्मुरारिः ।
गोपाङ्गनाश्चुक्रुशुरेत्य गोपा गोविन्द दामोदर माधवेति ॥

Jalāśaye Kāliyamardanāya Yadā Kadambādapatanmurāriḥ |
Gopāṅganāścukruśuretya Gopā Govinda Dāmodara Mādhaveti ||

SHLOKA 31

अक्रूरमासाद्य यदा मुकुन्दश्चापोत्सवार्थं मथुरां प्रविष्टः ।
तदा स पौरैर्जयतीत्यभाषि गोविन्द दामोदर माधवेति ॥

Akrūramāsādya Yadā Mukundaścāpotsavārthaṃ Mathurāṃ Praviṣṭaḥ |
Tadā Sa Paurairjayatītyabhāṣi Govinda Dāmodara Mādhaveti ||

SHLOKA 32

कंसस्य दूतेन यदैव नीतौ वृन्दावनान्ताद् वसुदेवसूनू ।
रुरोद गोपी भवनस्य मध्ये गोविन्द दामोदर माधवेति ॥

Kaṃsasya Dūtena Yadaiva Nītau Vṛndāvanāntād Vasudevasūnū |
Ruroda Gopī Bhavanasya Madhye Govinda Dāmodara Mādhaveti ||

SHLOKA 33

सरोवरे कालियनागबद्धं शिशुं यशोदातनयं निशम्य ।
चक्रुर्लुठन्त्यः पथि गोपबाला गोविन्द दामोदर माधवेति ॥

Sarovare Kāliyanāgabaddhaṃ Śiśuṃ Yaśodātanayaṃ Niśamya |
Cakrurluṭhantyaḥ Pathi Gopabālā Govinda Dāmodara Mādhaveti ||

SHLOKA 34

अक्रूरयाने यदुवंशनाथं सङ्गच्छमानं मथुरां निरीक्ष्य ।
ऊचुर्वियोगात् किल गोपबाला गोविन्द दामोदर माधवेति ॥

Akrūrayāne Yaduvaṃśanāthaṃ Saṅgacchamānaṃ Mathurāṃ Nirīkṣya |
Ūcurviyogāt Kila Gopabālā Govinda Dāmodara Mādhaveti ||

SHLOKA 35

चक्रन्द गोपी नलिनीवनान्ते कृष्णेन हीना कुसुमे शयाना ।
प्रफुल्लनीलोत्पललोचनाभ्यां गोविन्द दामोदर माधवेति ॥

Cakranda Gopī Nalinīvanānte Kṛṣṇena Hīnā Kusume Śayānā |
Praphullanīlotpalalocanābhyāṃ Govinda Dāmodara Mādhaveti ||

SHLOKA 36

मातापितृभ्यां परिवार्यमाणा गेहं प्रविष्टा विललाप गोपी ।
आगत्य मां पालय विश्वनाथ गोविन्द दामोदर माधवेति ॥

Mātāpitṛbhyāṃ Parivāryamāṇā Gehaṃ Praviṣṭā Vilalāpa Gopī |
Āgatya Māṃ Pālaya Viśvanātha Govinda Dāmodara Mādhaveti ||

SHLOKA 37

वृन्दावनस्थं हरिमाशु बुद्ध्वा गोपी गता कापि वनं निशायाम् ।
तत्राप्यदृष्ट्वातिभयादवोचद् गोविन्द दामोदर माधवेति ॥

Vṛndāvanasthaṃ Harimāśu Buddhvā Gopī Gatā Kāpi Vanaṃ Niśāyām |
Tatrāpyadṛṣṭvātibhayādavocad Govinda Dāmodara Mādhaveti ||

SHLOKA 38

सुखं शयाना निलये निजेऽपि नामानि विष्णोः प्रवदन्ति मर्त्याः ।
ते निश्चितं तन्मयतां व्रजन्ति गोविन्द दामोदर माधवेति ॥

Sukhaṃ Śayānā Nilaye Nije'pi Nāmāni Viṣṇoḥ Pravadanti Martyāḥ |
Te Niścitaṃ Tanmayatāṃ Vrajanti Govinda Dāmodara Mādhaveti ||

SHLOKA 39

सा नीरजाक्षीमवलोक्य राधां रुरोद गोविन्दवियोगखिन्नाम् ।
सखी प्रफुल्लोत्पललोचनाभ्यां गोविन्द दामोदर माधवेति ॥

Sā Nīrajākṣīmavalokya Rādhāṃ Ruroda Govindaviyogakhinnām |
Sakhī Praphullotpalalocanābhyāṃ Govinda Dāmodara Mādhaveti ||

SHLOKA 40

जिह्वे रसज्ञे मधुरप्रिया त्वं सत्यं हितं त्वां परमं वदामि ।
आवर्णयेथा मधुराक्षराणि गोविन्द दामोदर माधवेति ॥

Jihve Rasajñe Madhurapriyā Tvaṃ Satyaṃ Hitaṃ Tvāṃ Paramaṃ Vadāmi |
Āvarṇayethā Madhurākṣarāṇi Govinda Dāmodara Mādhaveti ||

SHLOKA 41

आत्यन्तिकव्याधिहरं जनानां चिकित्सकं वेदविदो वदन्ति ।
संसारतापत्रयनाशबीजं गोविन्द दामोदर माधवेति ॥

Ātyantikavyādhiharaṃ Janānāṃ Cikitsakaṃ Vedavido Vadanti |
Saṃsāratāpatrayanāśabījaṃ Govinda Dāmodara Mādhaveti ||

राम-कथा, गजेन्द्र और भक्तों की पुकार

SHLOKA 42

ताताज्ञया गच्छति रामचन्द्रे सलक्ष्मणेऽरण्यचये ससीते ।
चक्रन्द रामस्य निजा जनित्री गोविन्द दामोदर माधवेति ॥

Tātājñayā Gacchati Rāmacandre Salakṣmaṇe'raṇyacaye Sasīte |
Cakranda Rāmasya Nijā Janitrī Govinda Dāmodara Mādhaveti ||

SHLOKA 43

एकाकिनी दण्डककाननान्तात् सा नीयमाना दशकन्धरेण ।
सीता तदाक्रन्ददनन्यनाथा गोविन्द दामोदर माधवेति ॥

Ekākinī Daṇḍakakānanāntāt Sā Nīyamānā Daśakandhareṇa |
Sītā Tadākrandadananyanāthā Govinda Dāmodara Mādhaveti ||

SHLOKA 44

रामाद्वियुक्ता जनकात्मजा सा विचिन्तयन्ती हृदि रामरूपम् ।
रुरोद सीता रघुनाथ पाहि गोविन्द दामोदर माधवेति ॥

Rāmādviyuktā Janakātmajā Sā Vicintayantī Hṛdi Rāmarūpam |
Ruroda Sītā Raghunātha Pāhi Govinda Dāmodara Mādhaveti ||

SHLOKA 45

प्रसीद विष्णो रघुवंशनाथ सुरासुराणां सुखदुःखहेतो ।
रुरोद सीता तु समुद्रमध्ये गोविन्द दामोदर माधवेति ॥

Prasīda Viṣṇo Raghuvaṃśanātha Surāsurāṇāṃ Sukhaduḥkhaheto |
Ruroda Sītā Tu Samudramadhye Govinda Dāmodara Mādhaveti ||

SHLOKA 46

अन्तर्जले ग्राहगृहीतपादो विसृष्टविक्लिष्टसमस्तबन्धुः ।
तदा गजेन्द्रो नितरां जगाद गोविन्द दामोदर माधवेति ॥

Antarjale Grāhagṛhītapādo Visṛṣṭavikliṣṭasamastabandhuḥ |
Tadā Gajendro Nitarāṃ Jagāda Govinda Dāmodara Mādhaveti ||

SHLOKA 47

हंसध्वजः शङ्खयुतो ददर्श पुत्रं कटाहे प्रतपन्तमेनम् ।
पुण्यानि नामानि हरेर्जपन्तं गोविन्द दामोदर माधवेति ॥

Haṃsadhvajaḥ Śaṅkhayuto Dadarśa Putraṃ Kaṭāhe Pratapantamenam |
Puṇyāni Nāmāni Harerjapantaṃ Govinda Dāmodara Mādhaveti ||

SHLOKA 48

दुर्वाससो वाक्यमुपेत्य कृष्णा सा चाब्रवीत् काननवासिनीशम् ।
अन्तःप्रविष्टं मनसाजुहाव गोविन्द दामोदर माधवेति ॥

Durvāsaso Vākyamupetya Kṛṣṇā Sā Cābravīt Kānanavāsinīśam |
Antaḥpraviṣṭaṃ Manasājuhāva Govinda Dāmodara Mādhaveti ||

SHLOKA 49

ध्येयः सदा योगिभिरप्रमेयः चिन्ताहरश्चिन्तितपारिजातः ।
कस्तूरिकाकल्पितनीलवर्णो गोविन्द दामोदर माधवेति ॥

Dhyeyaḥ Sadā Yogibhiraprameyaḥ Cintāharaścintitapārijātaḥ |
Kastūrikākalpitanīlavarṇo Govinda Dāmodara Mādhaveti ||

जिह्वा से प्रार्थना

SHLOKA 50

संसारकूपे पतितोऽत्यगाधे मोहान्धपूर्णे विषयाभितप्ते ।
करावलम्बं मम देहि विष्णो गोविन्द दामोदर माधवेति ॥

Saṃsārakūpe Patito'tyagādhe Mohāndhapūrṇe Viṣayābhitapte |
Karāvalambaṃ Mama Dehi Viṣṇo Govinda Dāmodara Mādhaveti ||

SHLOKA 51

त्वामेव याचे मम देहि जिह्वे समागते दण्डधरे कृतान्ते ।
वक्तव्यमेवं मधुरं सुभक्त्या गोविन्द दामोदर माधवेति ॥

Tvāmeva Yāce Mama Dehi Jihve Samāgate Daṇḍadhare Kṛtānte |
Vaktavyamevaṃ Madhuraṃ Subhaktyā Govinda Dāmodara Mādhaveti ||

SHLOKA 52

भजस्व मन्त्रं भवबन्धमुक्त्यै जिह्वे रसज्ञे सुलभं मनोज्ञम् ।
द्वैपायनाद्यैर्मुनिभिः प्रजप्तं गोविन्द दामोदर माधवेति ॥

Bhajasva Mantraṃ Bhavabandhamuktyai Jihve Rasajñe Sulabhaṃ Manojñam |
Dvaipāyanādyairmunibhiḥ Prajaptaṃ Govinda Dāmodara Mādhaveti ||

SHLOKA 53

गोपाल वंशीधर रूपसिन्धो लोकेश नारायण दीनबन्धो ।
उच्चस्वरैस्त्वं वद सर्वदैव गोविन्द दामोदर माधवेति ॥

Gopāla Vaṃśīdhara Rūpasindho Lokeśa Nārāyaṇa Dīnabandho |
Uccasvaraistvaṃ Vada Sarvadaiva Govinda Dāmodara Mādhaveti ||

SHLOKA 54

जिह्वे सदैवं भज सुन्दराणि नामानि कृष्णस्य मनोहराणि ।
समस्तभक्तार्तिविनाशनानि गोविन्द दामोदर माधवेति ॥

Jihve Sadaivaṃ Bhaja Sundarāṇi Nāmāni Kṛṣṇasya Manoharāṇi |
Samastabhaktārtivināśanāni Govinda Dāmodara Mādhaveti ||

SHLOKA 55

गोविन्द गोविन्द हरे मुरारे गोविन्द गोविन्द मुकुन्द कृष्ण ।
गोविन्द गोविन्द रथाङ्गपाणे गोविन्द दामोदर माधवेति ॥

Govinda Govinda Hare Murāre Govinda Govinda Mukunda Kṛṣṇa |
Govinda Govinda Rathāṅgapāṇe Govinda Dāmodara Mādhaveti ||

SHLOKA 56

सुखावसाने त्विदमेव सारं दुःखावसाने त्विदमेव गेयम् ।
देहावसाने त्विदमेव जाप्यं गोविन्द दामोदर माधवेति ॥

Sukhāvasāne Tvidameva Sāraṃ Duḥkhāvasāne Tvidameva Geyam |
Dehāvasāne Tvidameva Jāpyaṃ Govinda Dāmodara Mādhaveti ||

SHLOKA 57

दुर्वारवाक्यं परिगृह्य कृष्णा मृगीव भीता तु कथं कथञ्चित् ।
सभां प्रविष्टा मनसाजुहाव गोविन्द दामोदर माधवेति ॥

Durvāravākyaṃ Parigṛhya Kṛṣṇā Mṛgīva Bhītā Tu Kathaṃ Kathañcit |
Sabhāṃ Praviṣṭā Manasājuhāva Govinda Dāmodara Mādhaveti ||

नामामृत और समापन

SHLOKA 58

श्रीकृष्ण राधावर गोकुलेश गोपाल गोवर्धन नाथ विष्णो ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥

Śrīkṛṣṇa Rādhāvara Gokuleśa Gopāla Govardhana Nātha Viṣṇo |
Jihve Pibasvāmṛtametadeva Govinda Dāmodara Mādhaveti ||

SHLOKA 59

श्रीनाथ विश्वेश्वर विश्वमूर्ते श्रीदेवकीनन्दन दैत्यशत्रो ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥

Śrīnātha Viśveśvara Viśvamūrte Śrīdevakīnandana Daityaśatro |
Jihve Pibasvāmṛtametadeva Govinda Dāmodara Mādhaveti ||

SHLOKA 60

गोपीपते कंसरिपो मुकुन्द लक्ष्मीपते केशव वासुदेव ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥

Gopīpate Kaṃsaripo Mukunda Lakṣmīpate Keśava Vāsudeva |
Jihve Pibasvāmṛtametadeva Govinda Dāmodara Mādhaveti ||

SHLOKA 61

गोपीजनाह्लादकर व्रजेश गोचारणारण्यकृतप्रवेश ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥

Gopījanāhlādakara Vrajeśa Gocāraṇāraṇyakṛtapraveśa |
Jihve Pibasvāmṛtametadeva Govinda Dāmodara Mādhaveti ||

SHLOKA 62

प्राणेश विश्वम्भर कैटभारे वैकुण्ठ नारायण चक्रपाणे ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥

Prāṇeśa Viśvambhara Kaiṭabhāre Vaikuṇṭha Nārāyaṇa Cakrapāṇe |
Jihve Pibasvāmṛtametadeva Govinda Dāmodara Mādhaveti ||

SHLOKA 63

हरे मुरारे मधुसूदनाद्य श्रीराम सीतावर रावणारे ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥

Hare Murāre Madhusūdanādya Śrīrāma Sītāvara Rāvaṇāre |
Jihve Pibasvāmṛtametadeva Govinda Dāmodara Mādhaveti ||

SHLOKA 64

श्रीयादवेन्द्राद्रिधराम्बुजाक्ष गोगोपगोपीसुखदानदक्ष ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥

Śrīyādavendrādridharāmbujākṣa Gogopagopīsukhadānadakṣa |
Jihve Pibasvāmṛtametadeva Govinda Dāmodara Mādhaveti ||

SHLOKA 65

धराभरोत्तारणगोपवेष विहारलीलाकृतबन्धुशेष ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥

Dharābharottāraṇagopaveṣa Vihāralīlākṛtabandhuśeṣa |
Jihve Pibasvāmṛtametadeva Govinda Dāmodara Mādhaveti ||

SHLOKA 66

बकीबकाघासुरधेनुकारे केशीतृणावर्तविघातदक्ष ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥

Bakībakāghāsuradhenukāre Keśītṛṇāvartavighātadakṣa |
Jihve Pibasvāmṛtametadeva Govinda Dāmodara Mādhaveti ||

SHLOKA 67

श्रीजानकीजीवन रामचन्द्र निशाचरारे भरताग्रजेश ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥

Śrījānakījīvana Rāmacandra Niśācarāre Bharatāgrajeśa |
Jihve Pibasvāmṛtametadeva Govinda Dāmodara Mādhaveti ||

SHLOKA 68

नारायणानन्त हरे नृसिंह प्रह्लादबाधाहर हे कृपालो ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥

Nārāyaṇānanta Hare Nṛsiṃha Prahlādabādhāhara He Kṛpālo |
Jihve Pibasvāmṛtametadeva Govinda Dāmodara Mādhaveti ||

SHLOKA 69

लीलामनुष्याकृतिरामरूप प्रतापदासीकृतसर्वभूप ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥

Līlāmanuṣyākṛtirāmarūpa Pratāpadāsīkṛtasarvabhūpa |
Jihve Pibasvāmṛtametadeva Govinda Dāmodara Mādhaveti ||

SHLOKA 70

श्रीकृष्ण गोविन्द हरे मुरारे हे नाथ नारायण वासुदेव ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥

Śrīkṛṣṇa Govinda Hare Murāre He Nātha Nārāyaṇa Vāsudeva |
Jihve Pibasvāmṛtametadeva Govinda Dāmodara Mādhaveti ||

SHLOKA 71

वक्तुं समर्थोऽपि न वक्ति कश्चिदहो जनानां व्यसनाभिमुख्यम् ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥

Vaktuṃ Samartho'pi Na Vakti Kaścidaho Janānāṃ Vyasanābhimukhyam |
Jihve Pibasvāmṛtametadeva Govinda Dāmodara Mādhaveti ||

COLOPHON

इति श्रीबिल्वमङ्गलाचार्यविरचितं श्रीगोविन्ददामोदरस्तोत्रं सम्पूर्णम् ।

Iti Śrībilvamaṅgalācāryaviracitaṃ Śrīgovindadāmodarastotraṃ Sampūrṇam |